# प्रसादगुणः

By
Dr. Kuldeep Sharma
Dept of Education,
Rashtriya Sanskrit Sansthan,
Jaipur Campus, Jaipur.

काव्यगुणस्वरूपम्

मानवजीवने गुणानां महत्त्वमतिविशिष्टम् अस्ति। यथा हि गुणवान् जनः समाजे सम्मानं प्राप्नोति, तथैव गुणवत् काव्यमपि काव्यरसरसिकेषु प्रशस्तं भवति। एवमेव यथा लोके गुणहीनो जनः समाजे न शोभते तथैव काव्यसंसारेऽपि गुणहीनं काव्यं नोचितं भाति इत्यतः स्पष्टमिदं यत् काव्यशास्त्रे गुणानां महत्त्वपूर्णं स्थानं वेविद्यते।

यथा मानवशरीरे भाूरता, धीरता, दयालुतेत्यादयो गुणाः शोभन्ते तथैव काव्येऽपि काव्यात्मभूतस्य रसस्य शोभां माधुर्यादयो गुणाः वर्धापयन्ति। यथोक्तम् –

**"रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा"**

# काव्यगुणभेदाः

आचार्यविश्वनाथमते गुणाः त्रिधा, यथा हि – **“गुणाः माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा”** अर्थात् माधुर्य–ओजस्–प्रसादश्चेति।

आचार्यवामनमते गुणाः दशधा भवन्ति। प्रायः माधुर्यगुणोपेताः प्रसादगुणयुक्ताश्च रचनाः एव कालजयं कृत्वा लोकानुरञ्जकाः भवन्ति।

यथा हि विश्वविश्ववन्दितस्य कालिदासस्य रचनाः प्रसादगुणयुक्ताः विद्यन्ते। तस्मादेव कारणात् सः यशश्शरीरेण अद्यापि जीवति।

प्र
सा
द
गु
ण
स्व
रू
प
म्

# प्रसादगुणः

प्रसादः अर्थात् प्रसन्नता हृदयाह्लादकता वा इति। येन काव्येन चित्ते प्रसन्नतायाः प्रतीतिर्जायते, तदेव प्रसादः इत्युच्यते।

लोकेऽपि यथा देवालये प्रसादः भेदभावं विनैव सर्वेषां कृते सहजसुलभो भवति, तथैव काव्येऽपि प्रसादः (गुणः) श्रवणमात्रेण विज्ञानाम् अविज्ञानाञ्च सर्वेषां कृतेऽपि सहजरूपेण अर्थस्य उपस्थापको भवति। एवमेव यथा हि तत्र देवालये लब्धे प्रसादे प्रसन्नता भवति, तथैव अत्र प्रसादगुणविशिष्टं काव्यम् आस्वाद्य सहृदयानां हृदयकमलं प्रमोदते।

प्र सा द गु ण स्व रू प म्

# प्रसादगुणः

## आचार्यविश्वनाथमते प्रसादगुणस्य लक्षणं स्वरूपञ्च

**चित्तं व्याप्नोति यः क्षिप्रं शुष्केधनमिवानलः**

अर्थात् यथा अग्निः शुश्केधने आर्द्रतारहितकाष्ठे वा शीघ्रमेव व्याप्तो भवति, तथैव गुणोऽयं चित्ते शीघ्रमेव व्याप्तो जायते।

गुणस्यास्य वैिष्ट्यं विद्यते यदयं समस्तेषु रसेषु अखिलासु रचनासु च जायते। अन्यदपि यदेतद्गुणोपेतायाः रचनायाः श्रवणमात्रेणैव शब्दाः अर्थबोधकाः भवन्ति।

आचार्याणां शब्देषु यथा :–

**शब्दास्तद्व्यञ्जकाः अर्थबोधकाः श्रुतिमात्रतः।**

उ
दा
ह
र
ण
म्

आचार्यविश्वनाथदृष्ट्या गुणस्यास्य उदाहरणं यथा

*सूचीमुखेन सकृदेव कृतव्रणस्त्वं,*

*मुक्ताकलाप! लुठसि स्तनयोः प्रियायाः।*

*बाणैः स्मरस्य शतशो विनिकृत्तमर्मा*

*स्वप्नेऽपि तां कथमहं न*

लोकरंजकः प्रसादः

## सहजार्थबोधकः प्रसादः

अत्र संस्कृतज्ञानां कृते अर्थस्य प्रतीतिः शीघ्रमेव …यते ।

सामान्यतः संस्कृतपरिचितानां कृते उदाहरणं यथा



परोपकाराय फलन्ति वृक्षाः,



परोपकाराय दुहन्ति गावः ।



परोपकाराय वहन्ति नद्यः,



स्वभाव एवैष परोपकारिणाम् ॥

लो
क
रं
ज
कः

प्र
सा
दः

# सहजार्थबोधकः प्रसादः

संस्कृतज्ञानविरहितानां कृतेऽपि उदाहरणं यथा :–

*त्वमेव माता च पिता त्वम*



*त्वमेव बन्धुश्च सखा त्वमेव*



*त्वमेव विद्या द्रविणं त्वम*



*त्वमेव सर्वं मम देवदेव।।*



अनेन स्पष्टमस्ति यत् प्रसादगुणयुक्ता रचना सर्वेषां जनानां कृते हृदयाह्लादिका जायते इति।



# धन्यवाद:

kuldeepsharma.rsks@gmail.com